# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम्–८ | गुणाः – ७० |
|---|---|---|
| विषयः – फलितज्योतिषम् | (C.E. - 2.3.6. OLD ) | समयः ८:०० तः ११:०० |
| दिनाङ्कः – १७/१०/२०१९ | सन्दर्भग्रन्थः–बृहज्जातकम् | |

**प्रथमान्विति:**

**प्रश्नः १ अधोलिखितेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत ।** **१०**

(१) क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः ।
तौक्षिकआकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥

(२) हेलिः सूर्यश्चन्द्रमाः शीतरस्मिर्हेम्ना विज्ञो बोधनश्चेन्दुपुत्रः ।
आरो वक्रः क्रूरदृक्यावनेयः कोणो मन्दः सूर्यपुत्रोऽसितश्च ॥

(३) क्रियां शिरो वक्त्रगलो वृषोऽन्ये पादोंऽसकं पृष्ठमुरोऽथ पार्श्वे ।
कुक्षित्स्वपानाङ्घ्रमपि मेढ्रमुस्कौ स्फिक्पुच्छमित्याह चतुष्पदांगे ॥

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** **१०**

(१) राशिप्रभेदविचारः ।

(२) वियोनिजन्मविचारः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत ।** **१०**

(१) क्षीणे हिमगौ व्ययगे पापैरुदयाष्टमगैः ।
केन्द्रेषु सुभाय न चेत्क्षिप्रं निधनं प्रवदेत् ॥

(२) आयुर्दायं विष्णुगुप्तोऽपि चैवं देवस्वामी सिद्धसेनश्च चक्रे ।
दोषश्चैषां जायतेऽष्टावरिष्टं हित्वा नायुर्विंशतेः स्यादधस्तात् ॥

(३) सम्यग्बलिनः स्वतुङ्गभागे सम्पूर्णा बलवर्जितस्य रिक्ता ।
नीचांशगतस्य शत्रुभागे ज्ञेयानिष्टफला दशाप्रसूतौ ॥

**प्रश्नः ४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** **१०**

(१) दशान्तर्दशाविचारः ।

(२) आजीविकाविचारः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत । १०**

(१) वर्गोत्तमगते लग्ने चन्द्रे वा चन्द्रवर्जितैः ।
चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः ॥

(२) पूर्वशास्त्रानुसारेण मया वज्रादयः कृताः ।
चतुर्थे भवने सूर्याज्ज्ञसितौ भवतः कथम् ? ॥

(३) स्वयमधिगतवितः पार्थिवस्तत्समो वा
भवति हि सुनफायां धीधनख्यातिमांश्च ।
प्रभुरगदशरीरः शीलवान्ख्यातकीर्ति-
र्विषयसुखसुवेषो निर्वृतश्यानफायाम् ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु । १०**

(१) नाभसयोगविचारः ।

(२) सुनफा-अनफादियोगाणां विविधभेदाः ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) बृहज्जातकस्य कर्ता कः ?

(२) कति नक्षत्राणि भवन्ति ?

(३) कर्कस्य स्वामी कः ?

(४) कालस्वरूपपुरुषस्य ज्ञानं कः ?

(५) तन्वादि कति भावाः भवन्ति ?

(६) द्रेष्काणे अस्य कति भागाः सन्ति ?

(७) प्रण शब्दस्य कोऽर्थः ?

(८) ज्ञ - कस्य ग्रहस्य पर्यायः ?

(९) एकस्मिन् अहोरात्रे कति घट्यः भवन्ति ?

(१०) कस्य ग्रहस्य गतेः परिवर्तनं न भवति ?

(११) कुज - इति शब्दस्य कोऽर्थः ?

(१२) अष्टकवर्गाध्याये कति श्लोकाः सन्ति ?

(१३) दशमोध्यायस्य नाम किम् ?

(१४) कुपतिशब्दस्य कोऽर्थः ?

(१५) नाभसयोगानां मध्ये कति विकल्पाः भवन्ति ?

----oooo----